This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ परस्परतपःसंपत्फलायितपरस्परौ॥प्रपंचमातापितरौप्राञ्चौजायापती नुमः स्त०१
१॥अलंकारेसुबालानामवगाहनसिद्धये॥ललितःक्रियतेतेषांलक्ष्यलक्षणसंग्रहः॥२॥उपमाय
त्रसादृश्यलक्ष्मीरुल्लसतिद्वयोः॥हंसीवकृष्णतेकीर्तिःस्वर्गगाममवगाहते॥३॥वर्ण्योपमानधर्माणा
मुपमावाचकस्यच॥एकद्वित्र्यनुपादानेभिन्नालुप्तोपमाष्टधा॥४॥तडिद्गौरींदुतुल्यास्याकर्पूरं
तीदृशोर्मम॥कांत्यास्मरवधूयंतीतन्वीदृष्टारहोमया॥५॥यत्तयामेलनंतत्रलाभोमेयश्चतद्रतेः॥
तदेतत्काकतालीयमवितर्कितसंभवं॥६॥उपमानोपमेयत्वंयदेकस्यैववस्तुनः॥इंदुरिंदुरिव
श्रीमानित्यादौतदनन्वयः॥७॥पर्यायेणद्वयोस्तच्चेदुपमेयोपमामता॥धर्मोर्थइवपूर्णश्री
रर्थोधर्मइवत्वयि॥८॥प्रतीपमुपमानस्योपमेयत्वप्रकल्पनं॥त्वल्लोचनसमंपद्मंत्वद्वक्त्रस
दृशोविधुः॥९॥अन्योपमेयलाभेनवर्ण्यस्यानादरश्चतत्॥अलंगर्वेणतेवक्त्रकांत्याचंद्रोपि ।१।

Acc. No. ~~945~~. M1490
Title - चन्द्रलोक (अपूर्ण)
Author - जयदेव.
Date - ?
Subject - Rhetoric.
folio - 10 (5 व 6 नं. चे folio गहाळ)
Xerox - 19

K K S U LIBRARY
RAMTEK
441 106
M.1490
Dist. Nagpur

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तादृशः॥१०॥ वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः। कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः संति हि स्त्रियः
॥११॥ वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत्। मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलांबुजं
॥१२॥ प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते। दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिंदुना॥१३॥ वि
षय्यभेदताद्रूप्यरंजनं विषयस्य यत्। रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः॥१४॥ अयं हि
धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्। अयमास्ते विना शंभुस्तार्तीयीकविलोचनं॥१५॥ शंभुर्वि
श्वमवत्यद्य स्वीकृत्य समदृष्टितां। अस्यामुखेंदुना नेत्रानंदे किमिंदुना॥१६॥ साध्वीयमपराल
क्ष्मीरसुधासागरोदिता। अयं कलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते॥१७॥ परिणामः क्रियार्थश्चे
द्विषयी विषयात्मना। प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा॥१८॥ बहुभिर्बहुधोल्लेखादेकस्यो
ल्लेख इष्यते। स्त्रीभिः कामोर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः॥१९॥ एकेन बहुधोल्लेखेप्यसौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०

विषयभेदतः ॥ गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने । स्यात्स्मृतिभ्रांतिसंदेहैस्तदंकाल्लंकृतित्रयं
॥ पंकजं पश्यतः कांतामुखं मे गाहते मनः ॥२१॥ अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पंकजं ॥ पंकजं वा सुधां
शुर्वा स्यस्माकं तु न निर्णयः ॥२२॥ शुद्धापन्हुतिरन्यस्यारोपार्थो धर्मनिन्हवः ॥ नायं सुधांशुः किं तर्हि व्यो
मगंगासरोरुहं ॥२३॥ स एव युक्तिपूर्वश्चेदुच्यते हेत्वपन्हुतिः ॥ नेंदुस्तीव्रो न निशि स्यादर्कः सिंधोरौर्वोयमु
त्थितः ॥२४॥ अन्यत्र तस्यारोपार्थः पर्यस्तापन्हुतिस्तु सा ॥ नायं सुधांशुः किं तर्हि सुधांशुः प्रेय
सीमुखं ॥२५॥ भ्रांतापन्हुतिरन्यस्य शंकायां भ्रांतिवारणे ॥ तापं करोति सोत्कंपं ज्वरः किं न सखि
स्मरः ॥२६॥ छेकापन्हुतिरन्यस्य युक्तितस्तथ्यनिन्हवे ॥ प्रजल्पन्मत्पदे लग्नः कांतः किं न हि नूपु
रः ॥२७॥ कैतवापन्हुतिर्व्यक्तौ व्याजाद्यैर्निन्हुतेः पदैः ॥ निर्यांति स्मरनाराचाः कांतादृक्पातकैत
वात् ॥२८॥ संभावनास्यादुत्प्रेक्षा वस्तुहेतुफलात्मना ॥ उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे प
रे ॥२९॥ धूमस्तोमं तमः शंके कोकीविरहशुष्मणां ॥ लिंपंतीव तमोंगानि वर्षतीवांजनं नभः ॥३०॥ २

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंतवांप्रिपुगुल्लंभुवि विक्षेपणा॥ ३०॥ वं।त्वन्मुखंभेछयानूनंपद्मैर्वैरायतेशशी॥ ३१॥ मध्यः किंकुच
क योर्धस्यैवद्वः किं दामभिः॥ प्रायोब्जंत्वन्मुखेनैक्यं प्राप्तुं तोयेतपस्यति॥ ३२॥ रूपकातिशयो
क्तिः स्यान्निगीर्याध्यवसानतः॥ पश्यनीलोत्पलद्वंद्वान्निःसरंति शिताः शराः॥ ३३॥ यद्यपन्हुतिग
न्द्र र्भत्वं सैवसापन्हवामता॥ त्वत्सूक्तिषुसुधाराजन्भ्रांताः पश्यंति तां विधौ॥ ३४॥ भेदकातिश
योक्तिस्तु तस्यैवान्यत्ववर्णनं॥ अन्यदेवास्यगांभीर्यमन्यद्धैर्यंमहीपतेः॥ ३५॥ संबंधातिश
योक्तिःस्यादयोगेयोगकल्पनं॥ सौधाग्राणिपुरस्यास्यस्पृशंति विधुमंडलं॥ ३६॥ अक्रमातिश
योक्तिः स्यात्सहत्वेहेतुकार्ययोः॥ आलिंगंतिसमंदेवज्यां शराश्चपरांश्चते॥ ३७॥ चपलातिश
हे योक्तिःस्तुकार्येहेतुप्रसक्तिजे॥ यास्यामीत्युदितेतन्व्यावलयोभवदूर्मिका॥ ३८॥ अत्यंतातिश
योक्तिस्तुपौर्वापर्यव्यतिक्रमे॥ अग्रेमानोगतःपश्चादनुनीता प्रियेण सा॥ ३९॥ यण्यीनामित
योगेप्ययोगोसंबंधातिशयो रितीर्यते॥ त्वयिदात
ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गि

रेषान्च धर्मैक्यं तुल्ययोगिता ॥ संकुचंति सरोजानि स्वैरिणीवदनानि च ॥ ६० ॥ त्वदंगमार्दवे दृष्टे कस्य
चित्ते न भासते ॥ मालतीशशभृल्लेखाकदलीनां कठोरता ॥ ६१ ॥ हिताहिते वृत्तितौल्यमपरा तुल्य
योगिता ॥ प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया ॥ ६२ ॥ गुणोत्कृष्टैः समीकृत्य वचोन्या तुल्ययो
गिता ॥ लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ॥ ६३ ॥ वदंति वर्ण्यावर्ण्यानां धर्म्यैक्यं दीपकं
बुधाः ॥ मदेन भाति कलभः प्रतापेन महीपतिः ॥ ६४ ॥ त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं
॥ वर्षत्यंबुदमालेयं वर्षत्येषा च शार्वरी ॥ ६५ ॥ उन्मीलंति कदंबानि स्फुटंति कुटजोद्गमाः ॥
माद्यंति चातकास्तृप्ता माद्यंति च शिखावलाः ॥ ६६ ॥ चेद्बिंबप्रतिबिंबत्वं दृष्टांतस्तदलंकृतिः ॥
त्वमेव कीर्तिमान्राजन्विधुरेव हि कांतिमान् ॥ ६७ ॥ वाक्यार्थयोः सदृशयोरैक्यारोपो निद
र्शना ॥ यद्दातुः सौम्यता सेयं पूर्णेंदोरकलंकता ॥ ६८ ॥ पदार्थवृत्तिमप्येके वदंत्यन्यां निदर्शनां ॥ ३
३+ का क्ययोरेकसामान्ये प्रति वस्तूपमा मता ॥ तापेन भ्राजते सूरः शूरश्चापेन राजते ॥ २

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्नेत्रयुगलं धत्ते लीलांनीलांबुजन्मनोः ॥४९॥ अपरां बोधनं प्राहुः क्रिययासत्सदर्थयोः ॥ नश्ये
द्राजविरोधीति क्षीणं चंद्रोदये तमः ॥५०॥ उदयन्नेव सविता पद्मेष्वर्पयति श्रियं ॥ विभावयन्स
मृद्धीनां फलं सुहृदनुग्रहं ॥५१॥ व्यतिरेको विशेषश्चेदुपमानोपमेययोः ॥ शैला इवोन्नताः
संतः किंतु प्रकृतिकोमलाः ॥५२॥ सहोक्तिः सहभावश्चेद्भासते जनरंजनः ॥ दिगंतमगमत्तस्य
कीर्तिः प्रत्यर्थिभिः सह ॥५३॥ विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते ॥ विद्या हृद्यापि सा
वद्या विना विनयसंपदं ॥५४॥ तच्चेत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते ॥ विना खलैर्वि
भात्येषा राजेंद्र भवतः सभा ॥५५॥ समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ॥ अयमै
द्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः ॥५६॥ अलंकारः परिकरः साभिप्रायविशेषणे ॥ सुधां
शुकलितोत्तंसस्तापं हरतु ने शिवः ॥५७॥ साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः ॥ चतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तु गम्यस्य

र्णांपुरुषार्थानांदातादेवश्चतुर्भुजः॥५८॥नानार्थसंश्रयःश्लेषोवर्ण्यावर्ण्योभयाश्रितः॥सर्व
दोमाधवःपायात्सयोगंगामदीधरत्॥५९॥अब्जेनत्वन्मुखंतुल्यंहरिणाहितसक्तिना॥उ
च्चरद्भूरिकीलालःशुशुभेवाहिनीपतिः॥६०॥अप्रस्तुतप्रशंसास्यात्सायत्रप्रस्तुताश्रया॥
एकःकृतीशकुंतेषुयोन्यंशक्रान्नयाचते॥६१॥प्रस्तुतेनप्रस्तुतस्यद्योतनेप्रस्तुतांकुरः
॥किंभृंगसत्यांमालत्यांकेतक्याकंटकेद्धया॥६२॥पर्यायोक्तं[illegible]र्वचोभंग्यंतराश्रयं
॥नमस्तस्मैकृतोयेनमुधाराहुवधूकुचौ॥६३॥पर्यायोक्तंतदप्याहुर्यद्व्याजेनेष्टसाधनं
॥यामिचूतलतांद्रष्टुंयुवाभ्यामास्यतामिह॥६४॥उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां॥स्तुति
निंदयोः॥कःस्वर्धुनिविवेकस्तेपापिनोनयसेदिवं॥६५॥साधुदूतिपुनःसाधुकर्तव्यंकि ६
मतःपरं॥यन्मदर्थेविलूनासिदंतैरपिनखैरपि॥६६॥स्तुत्यास्तुतेश्चगम्यत्वेव्याजस्तुतिरुदाहृता॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुपर्यंतपल्लवनमनोहरौ॥ जानुनी रत्नमुकुराकारे तस्य महीभुजः॥३॥ दीपकैकावली
योगान्मालादीपकमिष्यते॥ स्मरेण हृदये तस्यास्तेन त्वयि कृतौ स्थितिः॥४॥ उत्तरोत्तर
मुत्कर्षः सार इत्यभिधीयते॥ मधुरं मधु तस्माच्च सुधा तस्याः कवेर्वचः॥५॥ यथासंख्यं
क्रमेणैव क्रमिकाणां समन्वयः॥ शत्रुं मित्रं विपत्तिं च जय रंजय भंजय॥६॥ पर्यायो यदि प
र्यायेणैकस्यानेकसंश्रयः॥ पद्मं मुक्त्वा गता चंद्रं कामिनीवदनप्रभा॥७॥ एकस्मिन्नप्य
नेकं वा पर्यायः सोऽपि संमतः॥ अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि॥८॥ परिवृत्तिर्विनिम
योन्यूनाभ्युधिकयोर्मिथः॥ जग्राहैकं शरं मुक्त्वा कटाक्षात्स रिपुश्रियं॥९॥ परिसंख्या नि
षिध्यैकमेकस्मिन्वस्तुयंत्रणं॥ स्नेहक्षयः प्रदीपेषु न स्वांतेषु नतभ्रुवां॥१०॥ विरोधेतु
ल्यबलयोर्विकल्पालंकृतिर्मता॥ सद्यः शिरांसि चापान्वा नमयंतु महीभुजः॥११॥ वद्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांयुगपद्भावभाजांगुंफः समुच्चयः ॥ नश्यंतिपश्चात्सश्यंतिचरस्यंतिचभवद्विषः ॥ १२ ॥ अ
हंप्राथमिकाभाजामेककार्यान्वयोपिसः ॥ कुलंरूपंवयोविद्याधनंचमदयत्यमुं ॥ १३ ॥
क्रमिकैकगतानांतुगुंफः कारकदीपकं ॥ गच्छत्यागच्छतिपुनः पंथः पश्यतिपृच्छति ॥ १४
समाधिः कार्यसौकर्यंकारणांतरसंनिधेः ॥ उत्कंठिताचतरुणीजगामास्तंचभानुमान् ॥ १५
प्रत्यनीकंबलवतः शत्रोः पक्षेपराक्रमः ॥ जैत्रनेत्रानुगौकर्णोत्पलाभ्यामधःकृतौ ॥ १६
कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते ॥ सजितस्त्वन्मुखेनेंदुः कावार्तासरसीरुहां ॥ १७
स्वकीयंहृदयंभित्वानिर्गतौयौपयोधरौ ॥ हृदयस्यान्यदीयस्यभेदनेकाकृपातयोः ॥ १८
समर्थनीयस्यार्थस्यकाव्यलिंगंसमर्थनं ॥ जितोसिमंदकंदर्पमच्चित्तेस्तित्रिलोचनः ॥ १९
उक्तिरर्थांतरन्यासः स्यात्सामान्यविशेषयोः ॥ हनूमानब्धिमतरद्दुष्करंकिंमहात्मनां ॥ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणवद्वस्तुसंसर्गाद्यातिस्वल्पोपिगौरवं ॥ पुष्पमालानुषंगेणसूत्रंशिरसिधार्यते ॥२१॥ य
स्मिन्विशेषसामान्यविशेषाः सविकस्वरः ॥ सनजिग्येमहांतोहिदुर्धर्षाः सागराइव ॥२२॥ सै
दोक्तिरुत्कर्षाहेतोनहेतुत्वप्रकल्पनं ॥ कपाः कलिंदजातीरतमालस्तोममेचकाः ॥२३॥ सं
भावनायदित्थंस्यादित्यूहोन्यस्यसिद्धये ॥ यदिशेषोभवेद्वक्ताकथिताः स्युर्गुणास्तव ॥२४॥
किंचिन्मिथ्यात्वसिद्ध्यर्थंमिथ्यार्थांतरकल्पनं ॥ मिथ्याध्यवसितिर्वेश्यांवशयेत्खस्रजंवहन् ॥२५
प्रस्तुतंवर्ण्यवाक्यार्थप्रतिबिंबस्यवर्णनं ॥ ललितंनिर्गतेनीरेसेतुमेषाचिकीर्षति ॥२६॥
उत्कंठितार्थसंसिद्धिर्विनायत्नंप्रहर्षणं ॥ यामेवध्यायतेतस्मैनिसृष्टासैवदूतिका ॥२७
वांछितादधिकार्थस्यसंसिद्धिश्चप्रहर्षणं ॥ दीपमुद्योजयेद्यावत्तावदभ्युदितोरविः ॥२८
यत्नादुपायसिद्ध्यर्थात्साक्षाल्लाभः फलस्यच ॥ निध्यंजनौषधीमूलंखनतासाधितोनिधिः ॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकस्यगुणदोषाभ्यामुल्लासोन्यस्यतौयदि ।। अपिमांपावयेत्साध्वी स्नात्वेतीच्छतिजान्हवी ।।३०
काठिन्यंकुचयोःस्रष्टुंवांछंत्यःपादपद्मयोः ।। निंदंतिविश्वधातारंत्वद्धाटीष्वरियोषितः ।।३१।।
तदभाग्यंधनस्यैवयन्नाश्रयतिसज्जनं ।। लाभोयमेवभूपालसेवकानांनचेद्वधः ।।३२।। ताभ्यां
तौयदिनस्यातांनामवज्ञालंकृतिस्तुसा ।। स्वल्पमेवांबुलभते प्रस्थंप्राप्यापिसागरं ।।३३।। मील
तियदिपद्मानिकाहानिरमृतद्युतेः ।। दोषस्याभ्यर्थनानुज्ञा तत्रैवगुणदर्शनात् ।।३४।। वि
पदःसंतुनःशश्वद्यासुसंकीर्त्यते हरिः ।।३४।। लेशःस्याद्दोषगुणयोर्गुणदोषत्वकल्पनं ।।
अखिलेषुविहंगेषुहंतस्वच्छंदचारिषु ।।३५।। शुकपंजरबंधस्तेमधुराणांगिरांफलं ।।३५।।
सूच्यार्थसूचनंमुद्राप्रकृतार्थपरैःपदैः ।। नितंबगुर्वीतरुणीदृग्युग्मविपुलाचसा ।।३६।।
क्रमिकंप्रकृतार्थानांन्यासंरत्नावलींविदुः ।। चतुरास्यःपतिर्लक्ष्म्याःसर्वज्ञस्त्वंमहीपते ।।३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतं ॥ हरकं
ठांशुलिप्तो पि शेषस्त्वद्यशसा सीसितः ॥ २

तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ॥ पद्मरागायते नासामौक्तिकं तेऽधरत्विषा ॥ ३४ ॥ पू
र्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि ॥ दीपे निर्वापिते प्यासीत्कांचीरत्नैर्महन्महः ॥ [illegible] ॥ संग
तान्यगुणानंगीकारमाहुरतद्गुणं ॥ चिरं रागिणि मच्चित्ते निहितापि न रज्यसि ॥ ७१ ॥ प्राक्सि
द्धस्वगुणोत्कर्षोनुगुणः परसंनिधेः ॥ नीलोत्पलानि दधते कटाक्षैरतिनीलतां ॥ ७२ ॥ मीलि
तं यदि सादृश्याद्भेद एव न लक्ष्यते ॥ रसो नालक्षि लाक्षायाश्चरणे सहजारुणे ॥ ७३ ॥ सामा
न्यं यदि सादृश्याद्विशेषो नोपलक्ष्यते ॥ पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवां ॥ ७४ ॥ र
त्नस्तंभेषु संक्रांतप्रतिबिंबशतैर्वृतः ॥ लंकेश्वरः सभामध्ये न ज्ञातो वालिसूनुना ॥ ७५ ॥ भे
दवैशिष्ट्ययोः स्फूर्तावुन्मीलितविशेषकौ ॥ हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते ॥ ७६
लक्षितान्युदिते चंद्रे पद्मानि च मुखानि च ॥ किंचिदाकूतसहितं स्याद्गूढोत्तरमुत्तरं ॥ ७७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रासौ वेतसी पांथ तत्रेयं स्फुतरा सरित् ॥ ग्रामेस्मिन्प्रस्तरप्राये न किंचित्पांथ विद्यते ॥४८॥ प
योधरोन्नतिं दृष्ट्वा वक्तुं स्निग्धः सि चेद्वस ॥ प्रश्नोत्तरान्तराभिन्नमुत्तरं चित्रमुच्यते ॥४९॥ के दा
रपोषणरताः के खेटः [illegible] किंचलं वयः ॥ सूक्ष्मं पराशयाभिज्ञत्वेन साकूतचेष्टितं ॥५०॥ म
यि पत्रपालि साकेतैः सीमंतमणिमावृणोत् ॥ पिहितं परवृत्तांतज्ञातुः साकूतचेष्टितं ॥५१॥ प्रि
येगृहागतप्रातः कांतात्समकल्पयत् ॥५१॥ व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनं ॥ स्य
सखि पश्य गृहारामपरागैरस्मि धूसरा ॥५२॥ कस्य वा न भवेद्रोषः प्रियायाः सव्रणे धरे ॥
सभृंगं पद्ममाघ्रासीर्वारितापि मयाधुना ॥५३॥ गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रति कथ्यते
॥वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः ॥५४॥ विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि
॥वृषापेहि परक्षेत्रादिति वक्ति ससूचनं ॥५५॥ युक्तिः परातिसंधाने क्रियया मर्मगुप्तये ॥ स १.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

मालिखंतीह धृग्रास धनुः पौष्पं करे लिखत ॥५६॥ लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते
॥ सहस्व कतिचिन्मासान्मीलयित्वा विलोचने ॥५७॥ छेकोक्तिर्यत्र लोकोक्तेः स्यादर्थांतरग
र्भिता ॥ भुजंग एव जानीते भुजंगचरणं सखे ॥५८॥ वक्रोक्तिः श्लेषकाकुभ्यामन्यार्थस्य प्र
कल्पनं ॥ मुंच मानं दिनं प्राप्तं नेह नंदी हरांतिके ॥५९॥ स्वभावोक्तिः स्वभावस्य जात्यादिस्थ
स्य वर्णनं ॥ कुरंगैरुत्तरंगाक्षैः स्तब्धकर्णैरुदीक्षितं ॥६०॥ भाविकं भूतभव्यार्थसाक्षात्कार
स्य वर्णनं ॥ अहं विलोकये द्यापि युध्यंतेत्र सुरासुराः ॥६१॥ उदात्तमृद्धिसहितं श्लाघ्यं चान्यो
पलक्षणं ॥ सानौ यस्याभवद्युद्धं तद्धूर्जटि किरीटिनोः ॥६२॥ अत्युक्तिरद्भुतातथ्यशौर्यौदार्या
दिवर्णनं ॥ अर्थदातरि राजेंद्रे याचकाः कल्पशाखिनः ॥६३॥ राजन्स[illegible]प्यकूपारास्त्वत्प्रतापाग्निशो
षिताः ॥ त्वद्वैरिराजवनितावाष्पपूरेण पूरिताः ॥६४॥ निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनं ॥ ईदृ

गौदार्यसंपच्छौर्यादि

हा

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोऽश्वरिते ज्ञानिसत्संदोषाकरोऽभवान् ॥१६५॥ प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनं ॥ नद्यू
तमेतत्कितवक्रीडितं निशितैः शरैः ॥१६६॥ सिद्धस्यैव विधानं यत्तदाहुर्विध्यलंकृतिं ॥ पंचमोदंचने
काले कोकिलः कोकिलोऽभवेत् ॥१६७॥ हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते ॥ असावुदेति शीतांशु
र्मानछेदाय सुभ्रुवां ॥१६८॥ हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ॥ लक्ष्मीविलासो विदुषां कटा हेतुं
क्षा व्यंकटप्रभोः ॥१६९॥ इत्थं शतमलंकारा लक्षयित्वा निदर्शिताः ॥ प्राचामाधुनिकानां च मता
न्यालोच्य सर्वतः ॥१७०॥ ॥ चत्वारो रसवत्प्रेय ऊर्जस्वि च समाहितं ॥ भावस्य चोदयः संधिः शबलत्व
मिति त्रयं ॥१॥ अष्टौ प्रमाणालंकाराः प्रत्यक्षादिमुखाः क्रमात् ॥ एवं पंचदशानन्यानलंकारान्वि
दुर्बुधाः ॥२॥ रसवदुदाहरणं ॥ मुनिर्जयति योगींद्रो महात्मा कुंभसंभवः ॥ येनैकचुलके दृष्टौ दिव्यौ
तौ मत्स्यकछपौ ॥३॥ उर्जस्व्युदा० तत्सार्थिवस्कंधरे शातरुणीः संत्रासतः सत्वरं यांती वीरविलुंठने १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरभसंयाताः किरातावने ॥ निछंति स्तिमिमाः प्रस्तुतपुल्लकास्ते विस्मृतोपक्रमास्ता सानु
नरलैः स्तनैरतितरां लोकैरपांगैरपि ॥७॥ समिाहिते॰ पश्यामः किमियं प्रपद्यत इतिस्थै
र्यं भयालंबितं किं मां नालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ॥ इत्यन्योन्यविल
क्षदृष्टिचटुले तस्मिन्नवस्थांतरे सव्याजं हसितं मया धृतिहरो मुक्तस्तु बाणस्तया ॥५॥
भावोदयं॰ तदद्य विश्रम्य दयालुरेधि रे दिनं निनीषामि भवद्विलोकिनी ॥ अदर्शिपादेन
विलेखमपत्रिणा तवैव रूपेण समः समालियः ॥६॥ भावसंधि॰ एकाभ्रत्कुसुमायुधेषु
धिरिव प्रव्यक्तपुंखावलीजेतुर्मंगलपालिकेव पुलकैरन्याकपोलस्थली ॥ लीलाक्षी
क्षणमात्रभाविविरहक्लेशासहां पश्यतो द्रागाकर्णयतश्च वीरभवतः प्रौढाववेहेडंबरं
॥७॥ भावशबलत्वं॰ क्काकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मापनं श्रुतिमुदो कोपेपि कांतं सुखं ॥ किं वक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्ल
भा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्यो धरां धास्यति ॥ ८ ॥ प्रमाणालंकारः अथ प्रत्य
क्षं ॥ कांत कांतवदन प्रतिबिंबभग्नबालसहकारस्फुरगंधो ॥ स्वादुनिस्वणुदितालिनि
नीथे निर्ववार मधुनीद्रिमवर्गः ॥ ९ ॥ अनुमानं० रंध्रव्योम्नि श्वलज्जलदधूमः स्थगय
ति स्फुलिंगानां रूपं दधति च यथा कीटमणयः ॥ यथा विद्युज्ज्वालोल्लसितपरिपिंगाः
श्च ककुभस्तथा मन्ये लीनपथिततरुखं स्मरदवः ॥ १० ॥ उपमानं० तारोहिणी विजा
नी हि ज्योतिषां मध्यमंडले ॥ यस्तत्विं तारकान्या सः शाकपकार साश्रितः ॥ ११ ॥ शब्
दप्रमाणं० विवक्षितादोपमपि च्युतात्मनात्वयैकमीशां प्रतिसाधु भाषितं ॥ यमा
मनं यात्मभुवोपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥ १२ ॥ आचाररः० महाजन ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाचार परंपरेदृत्रास्विनामनाम नामाददतेन सा धवः॥ अतोभि धातुं न तदुत्सहे पुनर्जनः
किमाचारमुचंशि गायति॥१३॥ एवं श्रुति लिंगादिकमपि मीमांसोक्तं प्रमाणं। तत्र श्रुतिः
त्वं हितान्मे वरदो नाधत्से वर मुद्रिकां॥ नहि श्रुतिप्रसिद्धार्थे लिंगमाद्रियते बुधः॥१४
लिंगं यथा। विदितो वो यथा स्वार्थानमे काश्चित्प्रवृत्तयः॥ ननु मन्त्रिभिरष्टाभिरीश्वं
भूतोस्मि सूचितः॥१५॥ अर्थापत्ति॰ निर्णेतुं शक्यमस्तीति मध्यं तव नितंबिनी॥ अ
न्यथानोपपद्येत पयोधरभरास्थितिः॥१६॥ संभवोयं॰ अभूतपूर्वममभावि किं वास
र्वसहे मे सहजं हि दुःखं॥ किंतु धर्मेशरणागतानां पराभवो नाथन तेनुरूपः॥१७
अपसंकीर्णालंकाराः॥ कुंकुमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया॥ च
लितया विदधे कमलन्मेरवलाकलकल्लोलहृताश्न्यया॥१८॥ अगांगिभावसंकरो॰ तलेष्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेपंतमहीरुहाणां छायास्तदा मारुतकंपितानां ॥ शशांकसिंहेन नभोगजानां लूनाकृती
नामिव गात्रखंडाः ॥१९॥ समग्राधान्यरसकं॰ अवतु नः सवितुस्तुरगावली समतिलंघित
तुंगपयोधरा ॥ स्फुरति मध्यगतारुणनायका मरकतैकलतेव नभःश्रियः ॥२०॥ संदेह
संकरो॰ शारदीनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जन्हुकन्यावतीर्णा ॥
इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥२१॥ अ
नुप्रवेशासं॰ सत्सु घरघोतितरंगत्न्रो भिन्यमंदमारध्वमृदंगवाद्ये ॥ उद्यानवापीपय
सीव यस्यामेणादृशो नाथगृहे रमंते ॥२२॥ ॥ इति चंद्रालोकः संपूर्णः ॥ ॥
अन्यतोलब्धा श्वके चिह्नि रिविताः ॥ ॥ इदं पुस्तकं श्रीमत्सदवाक्यप्रमाणपारा
वारीण नारायणसूरिसूनु रामकृष्णाख्येन लिखितं पठनार्थं स्वार्थं परार्थं ॥ ॥ १२

KKSU LIBRARY
RAMTEK
441 106
M.1490
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.10.20 17:21
,TRANSFERRED=2020/10/21 at 17:24:25
,PAGES=19
,TYPE=STD
,NAME=S0004339
,Book Name=M-1490-CHANDRALOK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection